**अरण्यजीर** पु० । ६त० । वनजीरके ।

**अरण्यजीव** त्रि० अरण्येन तद्भवफलादिना जीवति जीव-क । वनस्थफलादिना जीविकावति वानप्रस्थादौ ।

**अरण्यधर्म्म** पु० अरण्ये आचरणीयो धर्मः । वानप्रस्थधर्म्मे । स च धर्मः "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् । सन्त्यज्य ग्राम्यमाहारं सर्व्वञ्चैव परिच्छदम् । पुत्त्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा । अग्निहोत्रं समादाय गृह्यञ्चाग्निपरिच्छदम् । ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः । मुन्यन्नैर्व्विविधैर्म्मेध्यैः शाकमूलफलेन वा । एतानेव महायज्ञान्निर्व्वपेद्विधिपूर्व्वकम् । वसीत चर्म्म चीरं वा सायं स्नायात् प्रगे तथा । जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च । यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षाञ्च शक्तितः । अम्मूलफलभिक्षाभिरर्च्चयेदाश्रमागतान् । स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्त्रः समाहितः । दाता नित्यमनादाता सर्व्वभूतानुकम्पकः । वैतानिकञ्च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कन्दयन् पर्व्व पौर्णमासञ्च योगतः । ऋक्षेष्ट्याग्रयणञ्चैव चातुर्म्मास्यानि चाहरेत् । उत्तरायणञ्च क्रमशो दक्षिणायनमेव च । वासन्तशारदैर्म्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैव विधिवन्निर्व्वपेत् पृथक् । देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः । शेषमात्मनि युञ्जीत लवणञ्च स्वयंकृतम् । स्थलजोदकशाकानि पुष्पमूलफलानि च । मेध्यवृक्षोद्भवान्यद्यात् स्नेहांश्च फलसम्भवान् । वर्जयेन्मधुमांसञ्च भौमानि कवकानि च । भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च । त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्व्वसञ्चितम् । जीर्णानि चैव वासांसि शाकमूलफलानि च । न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् । न ग्रामजान्यार्त्तोऽपि मूलानि च फलानि च । अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा । अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोपि वा । सद्यःप्रक्षालको वा स्यान्मासस़ञ्चयिकोऽपि वा । षण्मासनिचयो वा स्यात् समानिचय एव वा । नक्तञ्चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः । चतुर्थकालिको वा स्यात् स्याद्वाप्यष्टमकालिकः । चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् । पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् । पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा । कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः । भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत् सवने ष्वुपयन्नपः । ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः । उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत् । तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः । अग्नीनात्मनि वैतानान् समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः । अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः । शरणेष्वममश्चैव वृक्षमूलनिकेतनः । तापसेष्वेव विप्रेषु यात्रिकं भैक्ष्यमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु । ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा । एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् । विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः । ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः । विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये । अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः । आ निपाताच्छरीरस्य युक्तो वार्य्यनिलाशनः । आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनूम् । वीतशोकभयो विप्रो ब्रह्मलोके महीयते" मनुः ६अ० ।

**अरण्यधान्य** न० ६त० । नीवारादौ वनधान्ये ।

**अरण्य(ण्यानाम्)पति** पु० अरण्यानां तत्रस्थानां चौराणां पतिः वा अलुक् समा० । चौराधिष्ठातरि १रुद्रे "नमोनमोनिचेरवे परिचरायारण्यानां पतये नमः" यजु० १६, २०, "रुद्रो हि लीलया चौरादिरूपं धत्ते यद्वा रुद्रस्य जगदात्मकत्वाच्चौरादयो रुद्रा एव ध्येयाः यद्वा स्तेनादिशरीरे जीवेश्वररूपेण रुद्रोद्विधा तिष्ठति तत्र जीवरूपं स्तेनादिशब्दवाच्यम् तदीश्वररुद्ररूपं लक्षयति यथा शाखाग्रं चन्द्रम्" वे० दी० । तस्य सर्वनियन्तृत्वेन चौराणामपि पतित्वं युक्तमेव "एष एव साधु कर्म्म कारयति तं यमुन्निनीषते एष एवासाधु कर्म्म कारयति तं यमधोनिनीषते" इति श्रुत्या तस्य साध्वसाधुकर्म्मनियन्तृत्वस्योक्तेः पूर्व्वकृतकर्म्मसापेक्षत्वेन च न वैषम्यनैर्घृण्ये इत्याकरे व्यक्तम् । २अरण्यचरव्याधपतौ च ।

**अरण्यभव** त्रि० अरण्ये भवति भू-अच् । वनभवे ।

**अरण्यमक्षिका** स्त्री ६त० । (डाश) इति ख्याते दंशे ।

**अरण्यमार्ज्जार** पु० अरण्ये मार्ज्जारः । वनविड़ाले ।

**अरण्यमुद्ग** पु० ६त० । वनमुद्गे ।

**अरण्ययान** न० अरण्ये यानम् । अयोग्यकाले वनगमने "अरण्ययाने सुकरे पिता माम्" इति भट्टिः ।

**अरण्यरक्षक** पु० अरण्ये रक्षकः । वनरक्षके वनेषु लोकरक्षार्थं राज्ञा नियुक्तसैन्यभेदे ।